वैखानस विवाह मन्त्राः

३.२.२. प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः ।
अस्माकमिन्द्र उभयं जुजोषिति यत्सोम्यस्यान्धसो बुबोधति ॥
अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।
इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितस्सुव ॥
धर्मप्रजासंपत्त्यर्थं यज्ञापत्त्यर्थं ब्रह्मदेवर्षिपितृतृप्त्यर्थं प्रजासहत्वकर्मभ्यो ददामि ॥
प्रजापतिः स्त्रियां यशो मुष्कयोरदधात् सपम् । कामस्य तृप्तिमानन्दं तस्याग्ने
भाजयेह मा । मोदः प्रमोद आनन्दो मुष्कयोर्निहितः सपः । सृत्वेव कामस्य
तृप्याणि दक्षिणानां प्रतिग्रहे । मनसश्चित्तमाकूतिं वाचः सत्यमशीमहि । पशूनां
रूपमन्नस्य यशः श्रीः श्रयतां मयि । यथाहमस्या अतृपं स्त्रियै पुमान् यथा स्त्री
तृप्यति पुंसि प्रिये प्रिया । एवं भगस्य तृप्याणि यज्ञस्य काम्यः प्रियाम् ।
आदित्यः सत्यभोमिति । आपस्तत् सत्यमाभरन् । यशो यज्ञस्य दक्षिणाम् । असौ
मे कामः समृध्यताम् ॥ तेज आयुः श्रियं धन्यं सुमङ्गलं यशस्विनम् ।
दशपुत्रमविध्वनं कामयते । इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितः सुव ॥

३.२.३. सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।
मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां
सुमनस्यमानां ॥ द्योस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्तं
सविताभिरक्षतु । आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् ॥
सरस्वति प्रेदमव सुभगो वाजिनीवती । श्या त्वा विश्वस्य भूतस्य
प्रजायामस्याग्रतः । यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत् ।
तामध्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥
गृभ्णामि ते सौभग्त्वाा हस्तं मया पत्या जरदिष्टिर्यथासत् ।
भगो अर्यमा सविता पुरन्धिस्ते त्वा देवा अदुर्मह्यं पत्नीम् ॥
अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुचर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
इयं नार्युप्रब्रूतेऽग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥

३.२.४. विश्वा उत त्वया वयं धारा उदन्या इव अतिगाहेमहि द्विषः ॥

एकमिषे विष्णुरिति द्वे ऊर्जे इति त्रीणि व्रतायेति चत्वारिति पञ्च पशुभ्य इति षड्रायस्पोषायेति सप्त सप्तभ्य इति तान्पर्यायेणाक्रम्य गत्वा सखेति निवर्तेत ॥

मम हृदये हृदयं ते अस्तु मम चित्तं चित्तेनान्वेहि ।
मम वाचेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥

इह गावो निषीदन्त्वहाश्वा इह पुरुषाः ।
इहो सहस्रदक्षिणो अपि पूषा निषीदतु ॥

देवीः षड्वुर्वीरुरु णः कृणोत विश्वे देवास इह वीरयध्वन् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥

सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं ध्रुवतां ये ह नित्युः ।
षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकं भ्राजत्वष्टमीत्यरुन्धतीम् ॥

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवत स्थितम् ।
त्वं नक्षत्राणां मेथ्यसि स मा पाहि पुतन्यत ॥